CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

07

आतुरसंन्यासविधि:

MGCP

cript :- Devanagari. Meterial: P.

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

आतुरसन्यासविधिप्रारंभः॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

श्रीगणेशायनमः॥आसन्नसंकटेघोरेचोरव्याघ्रा
दिसंकुले॥भयंप्राप्तस्यसन्यासंकर्तव्यमनुरब्रवीत्॥
शस्त्रास्त्रजलवृक्षाणांशृंगिणांदंष्ट्रिणोपिच॥अ
शक्तोव्याधिपीडाभिःसन्यासंविधिवच्चरेत्॥आ
तुराणांतुसन्यासेनविधिर्नैवचक्रिया॥प्रैषमात्रंस
मुच्चार्यसन्यासंतत्रपूरयेत्॥साधकाशक्तदेवंविधिः
गतोदकसमीपंतुपात्रयोरपिचोद्धरेत्॥तयोरेक

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

करेपाथगृहीत्वादक्षिणेनतु॥एषवाग्निःप्राणः
प्राणंगच्छस्वांयोनिंगच्छस्वाहेतिप्रथमंजुहुया
त्॥आपोवैसर्वादेवताःसर्वाभ्यएवैनंदेवताभ्यो
जुहोति॥इतिद्वितीयं॥ततोहुतशेषंआशुःशि
शानइत्यनुवाकेनाभिमंत्र्य॥पुत्रेषणावित्तेषणा
दारेषणालोकेषणामयात्यक्ता॥स्वाहेतिशेषंत
तीयंशेषंपिबेत्॥ ॥आतुरसंन्यासविधिः॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

आतुरो अत्यातुरश्चेति॥ तत्र प्रथमआतुरविधिः कथ्यते॥
व्याध्यादित्यपीडितो गृहस्थः वपनपूर्वकं स्नात्वा॥ ब्राह्मणा
नाहूय॥ तेषां पुरतः प्रायश्चित्तपूर्वकं आतुरसन्यासमहं क
रिष्य इति संकल्प्य॥ पुनरपि गायत्रीं व्याहृतिषु प्रविलापया
मीति संकल्प्य॥ ॐ भूः तत्सवितुर्वरेण्यं गायत्रीं व्याहृतिषु
प्रवेशयामि॥ ॐ भुवः भर्गो देवस्य धीमहि सावित्रीं व्या
हृतिषु प्रवेशयामि॥ ॐ सुवः धियो यो नः प्रचोदयात्
सरस्वतीं व्याहृतिषु प्रवेशयामि॥ ॐ भूः तत्सवितुर्वरे
ण्यं भर्गो देवस्य धीमहि॥ गायत्रीं व्याहृतिषु प्रवेशयामि॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ॐ भुवः धियो यो नः प्रचोदयात् सावित्रीं व्याहृतिषु
प्रवेशयामि॥ ॐ स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य
धीमहि॥ धियो यो नः प्रचोदयात् सरस्वतीं व्याहृतिषु
प्रवेशयामि॥ अतः परं व्याहृतीः प्रणवेन प्रविलापया
मीति संकल्प्य॥ ॐ भूः इति व्याहृतीं प्रणवे प्रविलापया
मि॥ ॐ भुवः इति व्याहृतिं प्रणवे प्रविलापयामि॥ ॐ सु
वः व्याहृतिं प्रणवे प्रविलापयामि॥ ततः एकस्मिन् पात्रे ज
लं निक्षिप्य॥ आशुः शिशान इत्यनुवाकं जपित्वा॥ तज्ज
लं चतुर्दिक्षु अर्घ्यरूपेण दत्त्वा॥ पुनः किंचिज्जलं गृहीत्वा॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पुत्रैषणाय वित्तैषणाय दारैषणाय लोकैषणायश्च व्युत्थि
तोहमित्युक्त्वा॥ चतुर्दिक्षु पूर्ववज्जलं दत्वा॥ पुनरपि जलं
गृहीत्वा॥ अभयं सर्वभूतेभ्यो मत्तः स्वाहेति प्राच्यां जलं
दत्वा॥ अनेन मंत्रेण स्वयमपि जले प्राश्य उदकमंजलिना
पीत्वा॥ ततः शिखां छित्वा॥ यज्ञोपवीतं गृहीत्वा॥ भूर्भुवः
सुवः स्वाहेत्यप्सु जुहुयात्॥ वस्त्रादिकं सर्वं परित्यज्य दिगं
बरो भूत्वा॥ ऊर्ध्वबाहुः सूर्याभिमुखो भूत्वा॥ प्रैषोच्चार
णं कुर्यात्॥ तत्प्रकारस्तु॥ ॐ भूः सन्यस्तं मया॥ ॐ भुवः
सन्यस्तं मया॥ ॐ सुवः सन्यस्तं मया॥ ॐ भूः सन्यस्तोहं॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ॐ भुवः सन्यस्तोहं॥ ॐ सुवः सन्यस्तोहं॥ ॐ भूः अहं
सन्यस्तः॥ ॐ भुवः अहं सन्यस्तः॥ ॐ सुवः अहं सन्य
स्तः॥ मेदमद्य मोक्षैः ब्रह्माहमस्मीति ब्रूयात्॥ लोकव्य
वहारपार्थं कौपीनं काषायदंडं च गृह्णीयात्॥ असा
तुरस्तु प्रेषोच्चारणेन संन्यासी भवति॥ सन्यस्तं तु द्विजं
दृष्ट्वा स्थानाच्चलति भास्करः॥ एष मे मंडलं भित्वा आ
स्यतीति स्वकं पदं॥ द्वाविमौ पुरुषौ लोके सूर्यमंडलभे
ड्यो दिनौ॥ परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः॥ ॥
अथ यतिसंस्कारविधिरुच्यते॥ पुत्रो वा अन्यो वा गृहस्थः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

शिष्योवासिद्धिं प्राप्नुवंतं यतिं निरीक्ष्य॥ क्षौरं कृत्वास्ना
त्वाचम्य॥ गीताजपं कुर्वन्॥ देवतासन्निधौ गोमयेनोप
लिप्य॥ तत्र पूर्वाभिमुखं यतिं संस्थाप्य॥ कौपीनं दोरसहि
तं परित्यज्य॥ दंडं मुद्रा वर्जितं दक्षिणांशे निधाय॥ सालग्रा
मतीर्थेनाभिषिच्य॥ तुलसीमूलमृत्तिकया परिमृज्य॥ गो
पीचंदनं धारयित्वा॥ सालग्रामं पुरतः स्थापयेत्॥ सालग्राम
तीर्थेनाभिषिच्य॥ सिध्यनंतरं पुत्रो वा गृहस्थो वा स्नात्वा
चम्य॥ ब्राह्मणैरनुज्ञातः सन् प्राणानायम्य देशकालौ
संकीर्त्य सिद्धिंगतं यतिं परमहंसयतिनारायणं संस्कार

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रकर्मणा संस्करिष्य इति संकल्प्य॥ यतिशरीरः प्रणावे
न पंचामृतैः संप्रोक्ष्य प्रक्षाल्य॥ उपनिषद्भिर्वारुपोर्वैष्ण
व मंत्रैरद्भिः स्नापयित्वा॥ गंधस्यान्यैरलंकृत्य गीतवाद्य
पूर्वकमुपनिषदो जपित्वा शिक्ये विमाने संस्थाप्य॥ क
र्त्ता प्राचीमुदीचीं वा दिशं गत्वा शुद्धदेशे संस्थाप्य नदीतीरे
अश्वत्थमूले वा व्याहृतिभिः भूमिं संप्रोक्ष्य॥ दंडप्रमाणं
देवयज्ञनं खात्वा पुनर्व्याहृतिभिः संप्रोक्ष्य कुशानास्ती
र्य गायत्र्या यतिशरीरं प्रक्षाल्य॥ पुरुषसूक्तेन स्नाप

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

आतुर ५ यित्वा॥ हिरण्यवर्णा दधिक्राव्णः आपो हि ष्ठा मयो भुवः सन्यास
अतो देवा पवमान मंत्रैः सप्तव्याहृतिभिः प्रणवेन वाभि
षिच्य॥ पुरुषसूक्तविधानेन पूजयेत्॥ तत्पूजाप्रकारः॥ सह
स्रशीर्षेत्यावाहनं॥ पुरुष एवेदमित्यासनं॥ एतावानस्येति
पाद्यं॥ त्रिपादूर्ध्व इत्यर्घ्यं॥ तस्माद्विराडाचमनीयं॥ यत्पुरु
षेणेति स्नानं॥ तं यज्ञमिति वस्त्रं॥ तस्माद्यज्ञात्सर्वहुत इति यज्ञो
पवीतं॥ तस्माद्यज्ञात्सर्वहुत ऋचः इति गंधं॥ तस्मादश्वा
अजायंतेति पुष्पं॥ यत्पुरुषमिति धूपं॥ ब्राह्मणोस्यमि ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सोप्यसनत्कुमारस्य मध्यमेशैव मीरितं॥एतेयोगी
श्वरांसिद्धाःसनकाद्याःशिवादयः॥ तत्तीर्थपात्रंशिर
सिनियन्त्र्यंकृत्वा॥ लोकःसरस्वत्यायांतीति॥ अनुहा
न्यप्रतर्थंपीत्वाप्रदक्षिणानमस्कारान्कृत्वातैरनुज्ञा
तःइष्टैःसहभुंजीयात्॥एवंसिद्धदिवसेप्रतिसंवत्सरं
पार्वणश्राद्धंकुर्यात्॥तस्मिन्दिवसेपरेद्युर्वावित्तानुसा
रेणगुरोराराधनंकुर्यात्॥यतीनांसपिंडीकरणंनिषि
धत्पुत्रानां॥सपिंडीकरणेतेषांनकर्तव्यंपुत्रादिभिः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्रिदंडंग्रहणादेवप्रेतत्वन्योपिजायते॥एकोद्दिष्टंनकु
र्वीतयतीनांचैवसर्वदा॥आहत्येकादशेतेषांपार्वणंतु
विधीयते॥सपिंडीकरणंसन्यासिनांत्रिदंडिनामकु
दंडिमनोदंडिनावानकुर्यात्॥किंतुद्वादशेहनिपार्वणं
कुर्यात्॥तदाहोशनः॥चतुर्थमाश्रमंगछेब्रह्मविद्याप
रायणाः॥एकदंडीत्रिदंडीवासर्वसंगविवर्जितः॥ते
षांसपिंडीकरणंनकुर्यादौरसःसुतः॥ततःपुत्रादय
स्नात्वा॥मेत्तिकेदेवपूजादिकंकुर्युः॥नाशौचंनोदकंत्रि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

या मुक्तत्वेन प्रेतकार्याभावात्॥ ततः परेद्युः प्रभृति
दशाहपर्यंतं प्रत्यहं तत्र निक्षिप्तस्कानेवाह्निकां कृत्वा
मृत्तिकया लिंगाकारं कृत्वा॥ गंधपुष्पाक्षतादिभिः षो
डशोपचारैः संपूज्य॥ फलरूपरमान्नादिं यथासंभवं
समर्पयित्वा॥ गृहं प्रविशेत्॥ एतल्लिंगपूजादिकं लौ
किकं॥ तत एकादशेऽहनि द्वादशेऽहनि वा नारायणब
लिं कुर्यात्॥ तत एकादशेऽहनि द्वादशेऽहनि वा पुत्रः पू
र्वोक्तग्रामनामगोत्रादिना प्रत्याह्निकवत्॥ पार्वणम

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

माचरेत्॥ तस्मिन्दिने अनंतरं द्वादश्यां वा केशवादि
नामभिः आराधनं कुर्यात्॥ एवं प्रतिमासं सति विभ
वे समाराधनं कुर्यात्॥ न मासिकं सपिंडीकरणार्थं कृ
त्वानां मासिकानां पुनः स्वकालेनुष्ठानविधानात्॥ त
त्र सपिंडीकरणनिषेधात्॥ मासिकानं प्रेतकार्यं विमु
क्त्यार्थं नाद्य॥ ततो अंतसिद्धिदिने आत्मिकं आचरेत्
एकादशादिने पार्वणश्राद्धादिकं पुत्रस्यैव न तु भ्रात
तस्यैतस्यादेः॥ पत्न्यादेर्वा तेषां सति विभवे पि समा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

आतुर आराधनंकरिष्य इतिसंकल्प्य॥ अज्ञानतिमिरांधस्य सन्यास
९ ज्ञानांजनशलाकया॥ चक्षुरुन्मीलितंयेनतस्मैश्रीगुर
वेनमइतिनमस्कृत्य॥ चतुरस्रमंडलंकृत्वा॥ गोमयेनो
पलिप्य॥ पादौप्रक्षाल्य प्रक्षालितपादोदकंपात्रांत
रेगृहीत्वा॥ तत्तीर्थं षोडशोपचारैरभ्यर्च्य नानापुष्प
गंधादिभिरभ्यर्च्य॥ तीर्थंपीत्वा आचांतानुपवेश्य॥
नीराजनांतंकुर्यात् स्वाहांतंसनकायेतिपूर्वशिरीसुप्र
कल्पयेत्॥ यास्यासनातनायेतिसनंदनमथोत्तरे॥ ९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

धानेन एकैकऋचामंत्रेऊं नमो नारायणायेत्यंतेन पू
र्वोक्तप्रकारेण षोडोपचारपूजां कृत्वा॥ गुडमिश्रपरमा
न्ननैवेद्यं दत्वा॥ नमस्कृत्य स्नात्वाचम्य गृहं प्रवेशयेत्॥
एवमेव दशादिनपर्यंतं तर्पणपूजाबलिं कुर्यात्॥ एतत्सर्व
मुपनीतेन॥ एकादशेऽह्नि प्राप्ते स्नात्वा पुण्याहं वाचयित्वा
पुनः प्राणानायम्य॥ त्रिदंडिंगतस्य ब्रह्मीभूतस्य परमहं
सस्य नारायणबलिं करिष्य इति संकल्प्य॥ पुरुषसूक्त
विधानेन सालग्रामपूजां कृत्वा प्रदक्षिणानमस्कारान्वि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

राधनमात्रं ॥ एवं शिष्याणामपि समाराधनमात्रं ॥
तद्गुरुपरमगुरुपरमेष्ठिगुरूणां केशवादिद्वादश
नामभिः द्वादशब्राह्मणानां यथासंभवं वा समाराध
नमभ्युदयार्थं कुर्यात् ॥ पूर्वं नारायणबलिं कृं तरं पार्व
णश्राद्धं तत आराधनं कुर्यात् ॥ विष्णुसं ४ म ४ पूज्य वि
धिवद्दत्वार्घ्यं बलिमुत्तमां चरुं हुत्वा रुसूक्तेन पौरुषेण
तु षोडश ॥ द्वादशब्राह्मणान् भोज्या केशवाद्यैश्च नामभिः ।
यद्वा सर्वेषु कालेषु ब्राह्मणान्नैवं भोजयेत् ॥ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 धाय॥ स्वगृह्योक्तविधानेनाग्निमुखांते पुरुषसूक्तेषो
डशर्चिर्भिः समिदाज्यचरून्प्रत्येकं कृत्वा॥ केशवादिच
तुर्विंशन्नामभिः आज्याहुतीर्हुत्वा स्विष्टकृदादिहोमशे
षं समाप्य॥ प्राणानायम्य सिद्धिंगतस्य ब्रह्मीभूतस्य परमहंस स्य
नारायणस्य तृप्त्यर्थं ब्राह्मणान् यथासंभवसंख्यया
पुरुषाय नारायणायेति मंत्रेण पाद्यार्घ्यवस्त्रगंधपु
ष्पाणि च दद्यात् पुनश्चतुर्विंशति ब्राह्मणान्केशवादि
चतुर्विंशतिनामभिः चतुर्थ्यंतैर्वस्त्रादीनि दत्वा॥ सर्वो

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
नितान्ब्राह्मणानुपवेश्यभोजयेत्॥ भोजनसमये कर्तपुरुषसूक्तं वैष्णवसूक्तं भगवद्गीतांश्च जपेत्‌भोजनानंतरं प्रक्षालितहस्तान् ब्राह्मणानुपवेश्य तांबूलदक्षिणांचदत्वा प्रदक्षिणानमस्कारंकृत्वाविसर्जेत्॥ ।इति नारायणबलिः॥ ॥द्वादशेब्रह्मीभूतस्यपितुःपार्वणश्राद्धंकरिष्यइतिसंकल्प्य पूर्वाश्रमनामगोत्रमुच्चार्य विश्वेदेवपूर्वकं साधुरुचिसंज्ञिकाविश्वेदेवाःप्रत्याब्दिकवत्कुर्यात्॥ अथगुरोराराधनप्रकारः॥ त्रयोदशेहनि अस्मद्गुरुपरमगुरुपरमेष्ठिगुरुपरापरगुरूनुद्दिश्य
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDE

यतीनांसपिंडीकरणाभावश्चैकोद्दिष्टक्रियामनुस्मृताः॥तदासन्यास
हयमःप्राप्तेकोद्दिष्टंनकुर्वीतयतीनांचैवसर्वदा॥स्याहन्येक
द्दशेप्राप्तेपार्वणश्राद्धमाचरेत्॥बृहस्पतिः॥नचश्राद्धंमते
र्नस्यसपिंडीकरणंनचा॥अहन्येकादशेप्राप्तेकुर्यात्तस्यै
वपार्वणं॥सुमंतुः॥औरसःक्षेत्रजोवापिज्ञातावातत्सुते
पिवाकुर्यात्पार्वणश्राद्धंशिष्योतेवासिभूमिपाःहंसे
मृतेश्रुषः कुर्यात्पार्वणंपितृयज्ञवत्॥नारायणबलि
चैवतथापरमहंसके॥ ॥इतिआंगीरसोक्तआतुरस
न्यासविधिःसमाप्तः॥श्रीसांबसदाशिवार्पणमस्तु॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

आतुरसन्यासविधिःसमाप्तः॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri